International Journal of Sanskrit Research 2021; 7(6): 70-74

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 70-74
© 2021 IJSR
www.anantaajournal.com
Received: 07-09-2021
Accepted: 09-10-2021

**डः स्वपनमालः**

सहायकाध्यापकः संस्कृतविभागः

रायगञ्जविश्वविद्यालयः

उत्तरदिनाजपुरम्, पश्चिमवङ्गः,

भारतम्

**Corresponding Author:**

**डः स्वपनमालः**

सहायकाध्यापकः संस्कृतविभागः

रायगञ्जविश्वविद्यालयः

उत्तरदिनाजपुरम्, पश्चिमवङ्गः,

भारतम्

# विश्वकल्याणविधाने श्वेताश्वतरोपनिषदो भूमिका

**डः स्वपनमालः**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i6b.1552

**शोधसार**

सभ्यातायाः प्रारम्भतः इदानीन्तनकालपर्यन्तं विश्वेऽस्मिन् मानवाः प्राणीनश्च सदैव दुःखमनुभवन्ति। एतेषां मनुष्यानां प्राणीनाञ्च दुःखाहतरूपं दृष्ट्वा कल्याणकामिनः प्राणिनः नितरां तन्निवारणाय प्रयत्नं कृतवन्तोऽस्ति। बहुवर्षयावत् ते प्राणिनः तेषां बहिरङ्गदुःखनिवारणाय बहुविधोपायान्नाविस्कृतवन्तः। किन्तु ततःपरं तेऽनुभूतवन्तः तेषां सर्वाङ्गीनकल्याणे बहिरङ्गदुःखनिवारणादनन्तरमन्तरङ्गदुःखनिवारणमत्यन्तं प्रयोजनम्। ततस्ते बहुवर्षादनन्तरं द्विविधदुःखविनाशाय आत्मज्ञानमावश्यकमिति चिन्तितवन्तः। वैदिकसाहित्ये एतेषां चिन्तनानां प्रतिफलनं दृश्यते। तत्रोपनिषत्साहित्ये विश्ववासीनां मनुष्यानां प्राणीनाञ्च कल्याणविधाने विविधमार्गाः उपदिष्टाः ऋषिभिः। श्वेताश्वतरोपनिषदि अत्यन्तं सरलेन सोदाहरणेन तदुपायाः प्रदर्शिताः ऋषिणा श्वेताश्वतरेण। अत्र शोधप्रबन्धे विश्वकल्याणविधाने श्वेताश्वतरोपनिषदः कीदृशी भूमिका विद्यते तदालोचनं वर्तते।

**मुख्यशब्दाः** दुःखम्, उपनिषद्, श्वेताश्वतरः, कल्याणम्, दर्शनम्

## प्रस्तावना

श्वेताश्वतरोपनिषद् कृष्णयजुर्दीयतैत्तिरीयशाखान्तर्गताऽस्ति। ऋषिः श्वेताश्वतरोऽस्याः प्रवक्ताऽस्ति। तत्र श्वेताश्वतरोपनिषदि कथितमस्ति –

> तपः प्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्।
> अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्।।[1]

---

[1] श्वेताश्वतरोपनिषद् – ६/२१

परन्त्वस्याः उपनिषदः प्रख्यातः टीकाकारः प्राचार्यशंकरानन्दः श्वेताश्वतरशब्दस्य निर्वचनप्रसङ्गे कथितवान्- श्वेताः अवदाताः। सदाऽन्तर्मुखत्वेन विपरीतप्रवृत्तिरहिता अश्वा इन्द्रियाणि यस्य सः श्वेताश्वः। अतिशयेन श्वेताश्वः श्वेताश्वतरः। शंकरानन्दविरचितयाऽनया दीपिकाटीकया वक्तुं शक्यते यत् अश्वस्वरूपेन्द्रियाणि विपरीतप्रवृत्तिविषयेभ्यः संयतकरणं भवितव्यं तर्हि विश्वकल्याणसाधनेन वयं परिपूर्णं भविष्यामः इति शंकरानन्दस्य मतं वर्तते।

अस्या उपनिषदः सर्वप्रथममन्त्रे ब्रह्मवादिभिः जिज्ञासितमस्ति-

किं कारणं ब्रह्म कुतः स्म जाता
जीवामः केन क्व च सम्प्रतिष्ठाः।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थाम्।।[2]

अर्थात् ब्रह्मणः जगत्कारणत्वम्, सुखदुःखयोः नियामकत्वमित्यादिना विविधेन प्रश्नेनाऽस्माकं जीवनस्य परमजिज्ञासा समारोपिता। विश्वकल्याणं कथं सम्भवतीत्येतेषां प्रश्नानां सारार्थो वर्तते। शाश्वतजिज्ञासानामन्ते ऋषिणा श्वेताश्वतरेणोच्चारितो विश्वकल्याणविधायकः मन्त्रोऽस्यामुपनिषद्याम्नातः-

युजे वां ब्रह्म पूर्वं नमोभि-
र्विश्लोक एतु पथ्येव सूरेः।
शृण्वन्तु विश्वे अमृतस्य पुत्राः
आ ये धामानि दिव्यानि तस्थूः।।[3]

अस्य मन्त्रस्याभिनवव्याख्याकारः विश्वकविः रवीन्द्रनाथठक्कुरः तस्य नैवेद्यकाव्ये पद्यात्मकवङ्गभाषया कथितवान्-

एकदा ए भारतेर कोन् वनतले
के तुमि महान प्राण, की आनन्दबले
उच्चारि उठिल उच्चे, शोनो विश्वजन,
शोनो अमृतेर पुत्र यत देवगण
दिव्यधामवासी, आमि जेनेछि ताँहारे,
महान्त पुरुष यिनि आँधारेर पारे
ज्योतिर्मय। ताँरे जेने, ताँर पाने चाहि
मृत्युरे लङ्घिते पार, अन्य पथ नाहि।।[4]

श्वेताश्वतरोपनिषदि तृतीयाध्याये प्रतिफलितमस्ति-

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः पुरस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।[5]

भारतीयनवजागरणस्य जनकः राजाराममोहनरायोऽपि अस्या उपनिषदः नवोन्मेषप्रतिभाशाली भाष्यकारानुवादकश्चासीत्। शृण्वन्तु विश्वे अमृतस्य पुत्रा ये धामानि दिव्यानि तस्थूः- इति मन्त्रः तस्य समीपे आसीत् प्रियतमः। केवलं तं मन्त्रं बीजरूपेण मनसि निधाय अद्वैतवादस्य समर्थकः राजाराममोहनरायः समग्रविश्वं भारतवर्षस्य द्वारे आनीतवान्। आसीत् सर्वधर्मसमन्वयवादीरूपेण राममोहन परिचितः। रवीन्द्रनाथं निकषाऽपि श्वेताश्वतरोपनिषदो गुरुत्वपूर्णं स्थानमासीत् यत् संक्षेपेण इतःपूर्वमालोचितम्। विविधेषु शास्त्रेषु ग्रन्थेषु चास्य मन्त्रस्योपस्थापना कृता। शान्तिनिकेतनप्रबन्धमालायां स्थितेषु रवीन्द्रवाक्येषु विश्वव्यापी-विश्वबोध-ब्राह्मसमाजस्य सार्थकतासु, शिक्षाग्रन्थस्य शिक्षासमस्याप्रबन्धे, शान्तिनिकेतने चेत्यादिषु सन्दर्भेष्वयं मन्त्रो दृश्यते-

यो देवो अग्नौ यो अप्सु
यो विश्वं भुवनमाविवेश।
य ओषधीषु यो वनस्पतिषु

---

[2] तत्रैव – १/१

[3] तत्रैव – २/५

[4] रवीन्द्रनाथठक्कुरकृतं नैवेद्यकाव्यम् - ६०

[5] श्वेताश्वतरोपनिषद् – ३/८

तस्मै देवाय नमो नमः।।[6]

सर्वं खल्विदं ब्रह्म इत्यादिमहावाक्यस्य व्याख्याऽत्र प्राप्यते। अर्थात् सर्वत्रं तस्य ब्रह्मणः प्रकाशशीलत्वं वर्तते, सर्वभूते शिवरूपेण मङ्गलरूपेण च तस्य सर्वव्यापकस्य विभूत्वस्य ब्रह्मणोऽस्तित्वमनुभूयते। तस्मादुच्यते ऋषिणा श्वेताश्वतरेण-

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।
सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः।।[7]

आसीत् स्वामीविवेकानन्दोऽपि एतादृशस्य मतवादस्य तथा मानवतावादस्य समर्थकः। यत्र जीवः तत्र शिवः इति तस्य मूलमन्त्रमासीत्। विश्वकल्याणविधाने तथा साधने विवेकानन्दस्य भूमिकाऽतुलनीया इति वयं सर्वे जानीमः। संस्कृतसाहित्यस्योपनिषत्तत्त्वं हि तस्य आत्मनि मनसि च निहितमासीत्। श्वेताश्वतरोपनिषद् तस्य विवेकानन्दस्याऽतीव ग्रहणीया आसीत्। तेन रचितं बङ्गभाषाश्रितं पद्यं भवत्येतद्-

बहुरूपे सम्मुखे तोमा छाड़ि कोथा खुँजिछ ईश्वर ?
जीवे प्रेम करे येइजन सेइजन सेविछे ईश्वर।।

अयं मन्त्रोऽपि तस्य मनसि सर्वदा जाग्रतो वर्तते। तद्यथा-

त्वं स्त्री पुमानमसि त्वं कुमार उत वा कुमारी।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवति विश्वतोमुख।।[8]

इदं परमतत्त्वं केवलं न स्त्री-पुरुषयोर्मध्येऽवस्थितं परन्तु अस्मिन् महाविश्वे सर्वत्र तस्य विद्यमानताऽस्ति। सर्वव्यापकरूपेणाऽपि तस्याऽस्तित्वं सर्वत्रैवानुभूयते। तत्प्रसङ्गादृषिणोक्तम्-

नीलः पतङ्गो हरितो लोहिताक्षस्तडिद्गर्भऋतवः समुद्राः।

अनादिमत्त्वं विभुत्वेन वर्तसे यतो यातानि भुवनानि विश्वा।।[9]

अतः नास्ति तदपेक्षा किञ्चिद् सूक्ष्मतरं महत्तरं च। समग्रविश्वं व्याप्य तस्य ब्रह्मणः पूर्णत्वं विद्यते। निश्चलवृक्षवत् स्वरूपाऽवस्थायां तस्य परमतत्त्वस्य विद्यमानता स्वीकृताऽस्यामुपनिषदि-

यस्मात् परं नास्ति किञ्चिद्
यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्।
वृक्ष इव स्तब्ध दिवि तिष्ठत्येकः
तेनेदं पूर्णं पुरुषेण सर्वम्।।[10]

परमतत्त्वमिदमणोऽणीयान् अर्थात् सूक्ष्मात् सूक्ष्मतरं महतो महीयान्। सर्वजीवे बुद्धिरूपगुहायां प्रच्छन्नभावमवलम्ब्याऽवस्थितम्। तस्यानुग्रहेण सर्वसंकल्पवर्जितमीश्वरं वीक्ष्य साधको दुःखार्णवस्य परपारे गन्तुं शक्यते। तस्मिन् प्रसङ्गे ऋषिणा श्वेताश्वतरेणोच्चारितम्-

अणोरणीयान् महतो महीयानात्मा
गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशः।।[11]

जगदिदं निमित्तोपादानकारणेन ब्रह्मणा विनिर्मितं प्रकाशितञ्च। महाग्निवत् भास्वरशुक्लरूपयुक्तस्य ब्रह्मणः समीपे सूर्यतारकादेः दीप्तिः न भाति। केवलं ब्रह्मसहायेन तस्य प्रकाशमानतया वा सूर्यचन्द्रादयः विभान्ति। अस्यां श्वेताश्वतरोपनिषद्युद्घोषितमस्ति-

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।

---

[6] तत्रैव – २/१७

[7] तत्रैव – ३/११

[8] तत्रैव – ४/३

[9] तत्रैव – ४/४

[10] तत्रैव – ३/९

[11] तत्रैव – ३/२०

तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति।।[12]

सृष्टि-स्थिति-लयानां कारणमिदं परमतत्त्वं तथा ब्रह्मतत्त्वम्। निरवयव-कूटस्थ-शान्त-अनिन्द्य-निर्लिप्तत्वविशिष्टमिदममृतलाभस्य प्रसिद्धं कारणम्। अतः दग्धकाष्ठवत् देदीप्यमानपरमतत्त्वस्य शरणं हि श्रेयः। अत्र कथितमस्ति-

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्।।[13]

विश्वकल्याणकामिनः मानवाः स्वदेहमरणिं कृत्वा प्रणवञ्चोर्धारणिरूपेण गृहीत्वा ध्यान-निर्मथनाभ्यासात् परमतत्त्वं निगूढवत् पश्येयुः। तिलेषु तैलमिव दधिनी सर्पिषवत् यथा काष्ठेष्वग्निर्विद्यते तद्वत् सत्येन तपसा आत्मानं पश्यति साधकः। अर्थात् दुःखार्णवात् कल्याणकामिनः यदि मोक्षमिच्छन्ति तर्हि देवज्ञानं परमतत्त्वज्ञानं वा आवश्यकम्। तस्मादुच्यते-

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति।।[14]

समग्रश्वेताश्वतरोपनिषदनुसारेण वयं पश्यामो यत्नात्र केवलं बहिरङ्गसाधनेन विश्वकल्याणसाधनं सम्भवति, परन्तु ऋषिणा श्वेताश्वतरेण पुनःपुनरुक्तमन्तरङ्गसाधनाविषये। अर्थादत्र समग्रे द्वितीयाध्याये येगमार्गसहायेन यम-नियम-ध्यान-धारणादियोगाङ्गसाधनेन बहिरङ्ग-अन्तरङ्गयोः संयमकरणं सम्भवति। ततोऽधिकमत्र तात्पर्यसहकारेण सांख्य-योग-वेदान्त-शैवमार्गाभ्यामात्मतत्त्वं कथं भविष्यतीति सम्यक्तया अस्यामुपनिषदि वर्णितम्। अतः कथ्यते इन्द्रियसंयमेनात्मज्ञानेन चात्मकल्याणं विश्वकल्याणञ्चावश्यमेव भविष्यति। आत्मज्ञानं हि विश्वकल्याणस्योत्कृष्टः मार्गः। तस्मात् कारणादस्यामुपनिषद्युपसंहारे झंकृतमस्ति-

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।[15]

**सहायकग्रन्था**


1. गम्भीरानन्द, स्वामी, उपनिषद् ग्रन्थावली(१म), उद्बोधन कार्यालय, कलकाता, २०१३
2. गोस्वामी, नारायणचन्द्र, सांख्यतत्त्वकौमुदी, संस्कृत पुस्तक भाण्डार, कलिकाता, १४१८ वङ्गाव्द
3. चट्टोपाध्याय, सतीन्द्रमोहन, उपनिषदेर कथा, साहित्य संसद, कलकाता, २०१०
4. ठाकुर, रवीन्द्रनाथ, धर्म, विश्वभारती ग्रन्थनविभाग, कलकाता, १४१६ बङ्गाव्द
5. ठाकुर, रवीन्द्रनाथ, नैवेद्य, विश्वभारती ग्रन्थालय, कलिकाता, पुनर्मुद्रण १३५८ वङ्गाव्द
6. बन्द्योपाद्याय, हिरण्मय, उपनिषदेर दर्शन, साहित्य संसद, कलकाता, १९६३
7. भूतेशानन्द, स्वामी, उपनिषद् ओ आजकेर मानुष, उद्बोधन कार्यालय, कलकाता, २०१०
8. मुखोपाध्याय, गोविन्दगोपाल, उपनिषदेर अमृत, श्रीसारदा मठ, कलिकाता, २०१३
9. मेधाचैतन्य, ब्रह्मचारी, वेदान्तसारः, आद्यापीठ, कलिकाता, २०१४
10. वसु, योगीराज, उपनिषदेर भावादर्श ओ साधना, विश्वभारती, १९७५
11. विवेकानन्द, स्वामी, धर्मसमीक्षा, उद्बोधन कार्यालय, कलकाता, २००७


[12] तत्रैव – ६/१४

[13] तत्रैव - ६/१९

[14] तत्रैव – ६/२०

[15] तत्रैव – ६/२३

12. वेदान्तचुञ्चु, पूर्णचन्द्र, पातञ्जल दर्शन, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलकाता, २००५

13. श्रीमधुसूदन, रवीन्द्रनाथ ओ विवेकानन्देर दृष्टिते मानवधर्म, ज्ञानपीठ पाब्लिकेशन, कलकाता, २०१६